No. १२१९ घ

Title तर्कसंग्रहदीपिका शिशुहितारव्याटीकावा

Author अन्नंभट्ट०

Extent १५ पत्राणि Age

Subject न्याय शास्त्रम्

तर्कसंग्रहदीपिका

प्रियासुक्तिताख्या टीकावा

१२१५

पत्राणि १५

१५

तर्कसंग्रहदीपिका

५००

६२८

अलौकिकाविगीतर

श्रीगणेशाय नमः ॥ विश्वेश्वरं सांबमूर्तिं प्रणिपत्य गिरं गुरुं ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां ॥ १ ॥ चिकीर्षि
तस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मंग
लं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ॥ निधायेति ॥ ननु मंगलस्य समाप्तिसाधनत्वं नास्ति ॥ मंग
ले कृतेपि किरणा वल्यादौ समाप्त्यदर्शनात् ॥ मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शनात् ॥ अन्वयव्यतिरेकव्य
भिचारादिति चेन्न ॥ किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः ॥ कादंबर्यादौ ग्रंथाद्बहिरेव मंगलं कृतं अतो न व्यभिचा
रः ॥ ननु मंगलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न ॥ शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् ॥ तथा हि ॥ मंगलं वेदबोधि
तकर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् ॥ दर्शादिवत् ॥ भोजनादौ व्यभिचारवारणाय अलौकिके
ति ॥ रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति ॥ शिष्टपदं स्पष्टार्थं ॥ न कुर्यान्निष्फलं कर्मेति जलताडनादेरपि निषिद्ध
त्वात् ॥ तर्क्यंते प्रतिपाद्यंते इति तर्काः ॥ द्रव्यादिपदार्थाः ॥ तेषां संग्रहः संक्षेपेण स्वरूपकथनमित्यर्थः ॥ कस्मै प्रयोजनायेत्यत
आह ॥ सुखबोधायेति ॥ सुखेन अनायासेन बोधः पदार्थज्ञानं तस्मा इत्यर्थः ॥ ननु बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्वग्रं
थः क्रियत इत्यत आह ॥ बालानामिति ॥ तेषामतिविस्तृतत्वात् बालानां बोधो न भवतीत्यर्थः ॥ ग्रहणधारणपटुर्बालः न तु
स्तनंधयः ॥ किं कृत्वा क्रियत इत्यत आह ॥ निधायेति ॥ विश्वेश्वरं जगन्नियंतारं सांबमंबिकासहितं हृदि मनसि निधाय नितरां स्थापयित्वे
त्यर्थः ॥ गुरूणां विद्यागुरूणां नमस्कारं कृत्वा ॥ पदार्था [illegible] विभज्यंते ॥ द्रव्येति ॥ पदस्यार्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वं पदा
र्थसामान्यलक्षणं ॥ ननु विभागादेव सप्तत्वे सिद्धे सप्तग्रहणं व्यर्थमिति चेन्न ॥ आधिकसंख्या व्यवच्छेदार्थत्वात् ॥ ननु अतिरिक्तः

निर्विघ्नपरि
समाप्तिकामो
मंगलमाचरे
त् ॥

राम
९

पदार्थः प्रमितो न वा ॥ नाद्यः प्रमितस्य निषेधायोगात् ॥ नान्त्यः ॥ प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न ॥ पदार्थत्वं द्रव्यादि
सप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात् ॥ एवमग्रेऽपि द्रष्टव्यं ॥ द्रव्यं विभजते ॥ तत्रेति ॥ तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः ॥ का
नि तानि इत्यत आह ॥ पृथिवीत्यादि ॥ ननु तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि ॥ तथाहि ॥ नीलं तमश्चलतीति अबाधि
तप्रतीतिबलात् नीलरूपाश्रयत्वात् क्रियाश्रयत्वात् तमसो द्रव्यत्वं तावत् सिद्धं ॥ तच्च तमसो नाकाशादिपंचके ऽन्तर्भावः ॥ रूपवत्त्वात् ॥ तत एव न वा
योः सदागतिमत्त्वाभावात् स्पर्शाभावाच्च ॥ नापि तेजसि ॥ भास्वररूपाभावात् उष्णस्पर्शाभावाच्च ॥ नापि जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वा भा
च्च ॥ नापि पृथिव्यां गन्धाभावात् स्पर्शरहितत्वाच्च ॥ तस्मात्तमो दशमं द्रव्यमिति चेन्न तमसस्तेजोऽभावरूपत्वात् ॥ तथाहि तमो हि ॥ न रूपवद्द्रव्यं आलो
कसहकृतचक्षुर्ग्राह्यत्वाभावात् ॥ आलोकाभाववत्त्वरूपवत्तु रूपप्रमायां आलोकस्य कारणत्वात् तस्मात् प्रौढप्रकाशकतेजःसामान्याभावस्तमः ॥ तत्र
नीलं तमश्चलतीति प्रत्ययो भ्रमः ॥ अतो नव द्रव्याणीति ॥ द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणं ॥ लक्ष्यैकदेशवृत्तित्वमव्याप्तिः ॥ य
थागोः कपिलत्वं ॥ अलक्ष्यवृत्तित्वमतिव्याप्तिः ॥ यथा गोः शृंगित्वं ॥ लक्ष्यमात्रावर्तनमसंभवः ॥ यथा गोरेकशफत्वं ॥ एतद्दूषणत्रयरहितो धर्मो लक्षणं ॥
स एवासाधारणधर्म इत्युच्यते ॥ लक्ष्यतावच्छेदकसमनियतत्वं असाधारणत्वं ॥ व्यावर्तकस्यैव लक्षणत्वे व्यावृत्तावभिधेयत्वादौ वातिव्याप्तिः ॥
तद्वारणाय तद्भिन्नत्वं धर्मविशेषणं देयं ॥ व्यवहारस्यापि लक्षणप्रयोजनत्वेन देयं ॥ व्यावर्त्यादेरपि व्यवहारसाधनत्वात् ॥ ननु गुणवत्त्वं
न द्रव्यलक्षणं ॥ आद्यक्षणे उत्पन्नविनष्टद्रव्ये चाव्याप्तिरिति चेन्न ॥ गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात् ॥ ननु एव
मपि एकं रूपं रसात् पृथगिति व्यवहारात् रूपादौ अतिव्याप्तिरिति चेन्न ॥ एकार्थसमवायादेव तादृशव्यवहारोपपत्तेः ॥ गुणे गुणानंगीकारात् ॥ गुणं
विभजते रूपेति ॥ द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः ॥ गुणत्वजातिमान्वा ॥ ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतु

चवर

र्विंशतिर्गुणाः इति चेन्न । लघुत्वस्य गुरुत्वाभावरूपत्वात् । मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात् । कर्म विभज
ते । उत्क्षेपणेति । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । कर्मत्वजातिमद्वा । भ्रमणादीनामपि गमनेऽन्तर्भावान्न पं
चत्वविरोधः । सामान्यं विभजते । परमिति । परमधिकदेशवृत्ति । अपरं न्यूनदेशवृत्ति । सामान्यादिचतुष्टये जातिर्नास्ति ।
विशेषं विभजते नित्येति । पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपंचकं च नित्यद्रव्याणि । समवायस्य भेदो नास्ति
इत्याह । समवायस्त्वेक एवेति । अभावं विभजते । प्रागभावेति । तत्रोद्देशक्रमानुसारात् प्रथमं पृथिव्या लक्षणमाह । गन्ध
वतीति । नाम्ना पदार्थसंकीर्तनमुद्देशः । उद्देशक्रमे सर्वत्रैवेच्छा नियामिका । ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परवि
रोधेन गन्धानुत्पादनादव्याप्तिः । न च गन्धाप्रतीत्यनुपपत्तिरिति वाच्यं । अवयवगन्धस्यैव तत्र प्रतीतिसंभवेन चित्रगन्धा
नंगीकारात् । किं चोत्पन्नविनष्टघटादावव्याप्तिरिति चेन्न । गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात् ।
ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न । अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र भानांगीकारात् । ननु तथा
पि कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न । सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेन ल
क्षणं सत्त्वस्याभिमतत्वात् । पृथिवीं विभजते । सा द्विविधेति । नित्यत्वं ध्वंसाप्रतियोगित्वं । ध्वंसप्रतियोगित्वमनित्य
त्वं । प्रकारान्तरेण विभजते । पुनस्त्रिविधेति । आत्मनो भोगायतनं शरीरं । यदवच्छिन्ने आत्मनि भोगो जायते तद्भोगायतनं । सु
खदुःखसाक्षात्कारो भोगः । शरीरेन्द्रियभिन्नो विषयः । एवं च गन्धवच्छरीरं पार्थिवशरीरं गन्धवदिन्द्रियं पार्थिवेन्द्रियं । गन्ध

वान् विषयः पार्थिवविषयः। इतित्रयं त्रसरेणुं बोध्यं। कार्यविकारादीन् दर्शयति। शरीरमिति। इंद्रियं दर्शयति। इंद्रि-
यमिति। गंधग्राहकमिति प्रयोजनकथनं घ्राणमिति संज्ञा। नासाग्रेत्यादिना स्थानोक्तिः। एवमुत्तरत्र ज्ञेयं। पार्थिवं वि-
षयं दर्शयति। मृत्पाषाणादीति। अपां लक्षणमाह। शीतेति। उत्पन्नविनष्टे जलेऽव्याप्तिवारणाय शीतस्पर्शसा-
मानाधिकरणद्रव्यत्वापरजातिमत्वं तात्पर्यं। शीतत्वं शिलातलमित्यादौ जलसंयोगादेव शीतत्वस्य स्पर्शज्ञानमि-
ति नातिव्याप्तिः। अन्यं सर्वं पूर्ववदित्यादि ऊह्यम्। ध्येयं। तेजसो लक्षणमाह। उष्णस्पर्शवदिति। उष्णत्वं जगत्सिद्धमिति तेजः। तेज- पती। ५
संबंध्यानुविधायित्वात्। नातिव्याप्तिः। विषयं दर्शयति। सोमेति। ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वाद्वा हरिद्रा- ट्
दिवदितिचेन्न। अत्यंतानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते नाशादर्शनेन च सति
प्रतिबंधके पार्थिवद्रवत्वं रूपनाशाग्निसंयोगयोः कार्यकारणभावस्यावधारणात् सुवर्णस्य अत्यंतानलसंयोगे स-
ति अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्मात् पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव-
व्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः। रूपवत्तया वाय्वादिष्वंतर्भावात् तैजसत्वसिद्धिः।
तस्योष्णस्पर्शभास्वररूपयोरुपष्टंभकपार्थिवरूपस्पर्शाभ्यां प्रतिबंधादनुपलब्धिः। तस्मात् सुवर्णं तैज-
समिति। वायुं लक्षयति। रूपरहितेति। आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावतिव्याप्ति

कारणं रूपरहितद्रव्यं। ननु प्राणस्य कुत्रांतर्भाव इत्यताह। प्राण इति। संचरेति। एकः प्राणः स्थानभेदात्प्राणापा
नादिसंज्ञां लभत इत्यर्थः। स्पर्शानुमेयो वायुः। तथाहि योयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते स
स्पर्शः। क्वचिदाश्रितो गुणत्वात् रूपवत्। नचास्य पृथिव्याश्रयः उद्भूतस्पर्शवतः पार्थिवस्य उद्भूतरूप
वत्त्वनियमात्। न जलतेजसी। अनुष्णाशीतत्वात्। न विभुचतुष्टयं। सर्वत्रोपलब्धिप्रसंगात्। न मनः परमाणु
स्पर्शस्यातींद्रियत्वात्। तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वाद्घटवदि
तिचेन्न। उद्भूतरूपवत्त्वस्योपाधित्वात्। यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्षत्वं तत्र उद्भूतरूपवत्त्वमिति साध्य
व्यापकत्वं। पक्षे साधनाव्यापकत्वं। नचैवं। तप्तवारिस्थतेजसोप्रत्यक्षत्वापत्तिः। इष्टत्वात्। तस्माद्रूपरहित
त्वाद्वायुरप्रत्यक्षः। इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते। ईश्वरस्य चिकीर्षावशा
त्। परमाणुषु क्रिया जायते ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते। त्रिभिर्द्व्यणुकैः त्र्यणुकमुत्पद्यते।
एवं चतुरणुकादिक्रमेण महापृथिवी। महत्यापः। महत्तेजः। महान्वायुरुत्पद्यते। एवमुत्पन्नस्य कार्यस्य संजि
हीर्षावशात्। क्रियया परमाणुद्वयविभागे सति द्व्यणुकनाशः ततः त्र्यणुकचतुरणुकस्य नाशः इत्येवं पृथि
व्यादिनाशः असमवायिकारणनाशात् द्व्यणुकनाशः। समवायिकारणनाशात् त्र्यणुकादिनाशः॥ इति संप्रदायः।

सर्वथासमवायिकारणनाशात् द्रव्यनाशः इति नवीनाः। ननु परमाणुसद्भावे किं प्रमाणं। उच्यते। जालसूर्यमरीचिस्थ
सूक्ष्मतमं रजः। उपलभ्यते यत् तत् स्वल्पपरिमाणवद्द्रव्यारब्धं महत्त्वात् घटवत्। अणुकावयवोपि सावयवः। महदारंभकत्वात् तं
तुवत्। यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः। कार्यत्वे अनवस्थाप्रसंगात्। सृष्टिस्थितिप्रलयसद्भावे
ध्याता यथापूर्वमकल्पयदित्यादिश्रुतिः प्रमाणं। सर्वकार्यध्वंसोऽवान्तरप्रलयः। सर्वभावकार्यध्वंसो महाप्रल
य इति विवेकः। आकाशं लक्षयति। शब्दगुणमाकाशं इति। ननु आकाशमपि किं पृथिव्यादिवत् नाना नेत्या
ह। तच्चैकमिति। भेदे प्रमाणाभावादित्यर्थः। एकत्वादेव सर्वत्र शब्दोपलब्धेः। विभुत्वमेवाकत्ववमित्यत आह। विभ्वि
ति। सर्वमूर्त्तद्रव्यसंयोगित्वं विभुत्वं। मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं। क्रियावत्त्वं वा। विभुत्वादेवात्मवत् नि
त्यत्वमित्याह। नित्यं चेति। कालं लक्षयति। अतीतेति। सर्वाधारः कालः। सर्वकार्यनिमित्तकारणं वा। दिशो लक्षण
माह। प्राचीति। दिगादिकं सर्वमाश्रेनिमित्तकारणं। आत्मनो लक्षणमाह। ज्ञानेति। आत्मानं विभजते। स च द्विविधे
ति। परमात्मनो लक्षणमाह। तत्रेति। नित्यज्ञानाधिकरणत्वं ईश्वरत्वं। ननु ईश्वरसद्भावे किं प्रमाणं। न तावत्प्रत्य
क्षं। तद्धि बाह्यं आन्तरं वा। नाद्यः। अरूपिद्रव्यत्वात्। नान्त्यः। आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानं। लिंगाभा
भावादिति चेन्न। अंकुरादिकं। कर्तृजन्यं। कार्यत्वात्। घटवत्। इत्यनुमानस्य प्रमाणत्वात्। उपादानगोचरापरोक्ष
ज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं। उपादानं समवायिकारणं। सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वं। यः सर्वज्ञः

सर्वविदित्यागमोपि तत्र प्रमाणं। जीवस्य लक्षणमाह। ज्ञानीवेति। सुखादिकं जीवलक्षणं। ननु मनुष्योहं ब्राह्मणोहं
इत्यादौ सर्वत्राहं प्रत्यये शरीरस्यैव विषयत्वात् शरीरमेवात्मेति चेन्न। शरीरस्य करपादादिनाशे शरीरना
शात् आत्मनोपि नाशप्रसंगात्। नापि इंद्रियाणां आत्मत्वं। योहं घटमद्राक्षं सोहमिदानीं स्पृशामि इत्यनुसं
धानाभावप्रसंगात्। अन्यानुभूते अन्यस्यानुसंधानायोगात् तस्मात् देहेंद्रियादिव्यतिरिक्तो जीवः। सुखदु
खादिवैचित्र्यात् प्रतिशरीरं भिन्नः। न च परमाणुः शरीरव्यापि सुखाद्यनुपलब्धिप्रसंगात्। न मध्यमपरि
माणः तथा सत्यनित्यत्वप्रसंगात् तस्मान्नित्यो विभुर्जीवः। मनसो लक्षणमाह। सुखेति। स्पर्शरहितत्वे स
ति क्रियावत्त्वं मनसो लक्षणं। मनो विभजते। तच्चेति। एकैकैकस्यात्मनः एकैकैकं मनः। इत्यात्मनामनेकत्वात्
मनसोप्यनेकत्वमित्यर्थः। परमाणुरूपमिति मध्यमपरिमाणत्वे अनित्यत्वप्रसंगात् इत्यर्थः। ननु मनो वि
भु स्पर्शरहितद्रव्यत्वात्। आकाशवदिति चेन्न। मनसो विभुत्वे आत्मनः संयोगस्य समवायिकारणस्याभा
वात् ज्ञानानुत्पत्तिप्रसंगात्। न च विभुद्वयसंयोगोस्त्विति वाच्यं। तत्संयोगस्य नित्यत्वे सुषुप्त्यभावप्रसंगात्
पुरीतति तद्व्यतिरिक्तप्रदेशे आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्। अणुत्वे तु यदा मनः पुरीतति प्रविशति तदा
सुषुप्तिः। यदा निःसरति तदा ज्ञानोत्पत्तिरिति अणुत्वसिद्धिः। रूपं लक्षयति। चक्षुरिति। संख्यां दर्शयति शुक्लादिनिवार
णाय मात्रपदं। रूपत्वे अतिव्याप्तिवारणाय गुणपदं। नन्वव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति

चेन्न। रूपस्य व्याप्यवृत्तित्वनियमात्। ननु चित्रपटे अवयवरूपस्यैव प्रतीतिरिति चेन्न। रूपरहितत्वेन पटस्या-
प्रत्यक्षत्वप्रसंगात्। न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकं गौरवात्। तस्मात् पटस्य प्रत्यक्षत्वानुपपत्त्या वि-
चित्ररूपसिद्धिः। रसं लक्षयति। रसनेति। रसत्वे अतिव्याप्तिवारणाय गुणपदं। रसाश्रयमाह। पृथिवीति। आश्र-
यं विभज्य दर्शयति। पृथिव्यामिति। गंधं लक्षयति। घ्राणेति। गंधत्वे अतिव्याप्तिनिवारणाय गुणपदं। स्पर्शं लक्ष-
यति। त्वगिंद्रियेति। स्पर्शत्वे अतिव्याप्तिवारणाय गुणपदं। संयोगादावतिव्याप्तिवारणाय मात्रपदं। पाकजमिति। पा-
पूर्व कालेन तेजःसंयोगः। तेनैकरूपं नाशयित्वा रूपान्तरमुत्पाद्यत इत्यर्थः। अत्र परमाणुष्वेव पाकः न द्व्यणुकादिषु। आपाकनि-
क्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः स-
मवायिकारणं। तेजःसंयोगः असमवायिकारणं। अदृष्टादिकं निमित्तकारणं। द्व्यणुकादिरूपे कारणरूपं समवा-
यिकारणमिति। पीलुपाकवादिनः। पूर्वघटस्य नाशं विनैव अवयविन्यवयवेषु परमाणुपर्यंतेषु युगपत् रूपांत-
रोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः। अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः। अन्यत्रेदं नित्य-
र्थः। नित्यगतमिति। परमाणुगतमित्यर्थः। अनित्यगतमिति द्व्यणुकादिगतमित्यर्थः। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं त-
म प्रत्यक्षसंप्रयोजको धर्मः तदभावः अनुद्भूतत्वं। संख्यां लक्षयति। एकेति। परिमाणं लक्षयति। मानेति। परिमाणं वि-
भजते। तच्चेति। भावप्रधानो निर्देशः। अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः। पृथक्त्वं लक्षयति। पृथगिति। इदम-

स्मात्पृथगिति व्यवहारकारणमित्यर्थः। संयोगं लक्षयति। संयुक्तेति। इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः। संयोगादि
लक्षणे सर्वत्र दिक्कालादावतिव्याप्तिवारणाय असाधारणेति। संयोगो द्विविधः। कर्मजः संयोगजश्च। आद्यो हस्तक्रि
यया पुस्तकसंयोगः। द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः। अव्याप्यवृत्तिः संयोगः। स्वात्यन्ताभावस
मानाधिकरणत्वमव्याप्यवृत्तित्वं। विभागं लक्षयति। संयोगेति। कालादावतिव्याप्तिवारणाय गुणेति। रूपादावतिव्या
प्तिवारणाय संयोगनाशकेति। विभागोऽपि द्विविधः। कर्मजो विभागजश्चेति। आद्यो हस्तपुस्तकविभागः। द्वितीयः
कायपुस्तकविभागः। परत्वापरत्वयोर्लक्षणमाह। परापरेति। परव्यवहारकारणं परत्वं। अपरव्यवहारकारणमप
रत्वं इत्यर्थः। विभजते। ते द्विविधे इति। दिक्कृतयोरुदाहरणमाह। दूरस्थे इति। कालकृते उदाहरति। ज्येष्ठेति। कनिष्ठेति। गु
रुत्वं लक्षयति। आद्येति। द्वितीयादिपतनस्य वेगसमवायिकारणत्वात् वेगेऽतिव्याप्तिवारणाय आद्येति। द्रवत्वं ल
क्षयति। स्यन्देनेति। स्यन्दनं स्रवणं। तेजःसंयोगजन्यं नैमित्तिकं। तद्भिन्नं सांसिद्धिकं। पृथिव्यां नैमित्तिकमुदाहरति। घृता
दाविति। तेजसि तदाह। सुवर्णादाविति। स्नेहं लक्षयति। चूर्णेति। कालादावतिव्याप्तिवारणाय गुणेति। रूपादावतिव्या
प्तिवारणाय पिण्डीभावेति। शब्दं लक्षयति। श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय गुणेति। रूपादावतिव्याप्ति
वारणाय श्रोत्रेति। ध्वन्येति। शब्दस्त्रिविधः। संयोगजो विभागजः शब्दजश्चेति। तत्राद्यः। भेरीदण्डसंयोगजः। द्वितीयो

वंशोत्पामानेदं लक्ष्यविभागं कृत्वा स्वरूपं वर्णयमानः शब्दः। भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः शब्दजाः। बुद्धेर्लक्षणमाह। बुद्धिरिति। ज्ञानामीत्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः। बुद्धिं विभजते। सेति। स्मृतेर्लक्षणमाह। संस्कारेति। भावनाख्यः संस्कारः। संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति। अनुभवं लक्षयति। तद्भिन्नमिति। स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः। अनुभवं विभजते। स द्विविध इति। यथार्थानुभवस्य लक्षणमाह। तद्वतीति। ननु घटे घटत्वमिति प्रमाया अव्याप्तिः। घटत्वे घटाभावादिति चेन्न। यत्र यत्संबंधोऽस्ति तत्र तत्संबंधानुभव इत्यर्थात्। घटत्वे घटसंबंधोऽप्यस्तीति नाव्याप्तिरिति। अनुभव एव ज्ञानस्य प्रमेत्युच्यत इत्यर्थः। अयथार्थेति ।। ननु इदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न। यदवच्छेदेन यत्संबंधस्तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षितत्वात्। संयोगाभावावच्छेदेन यत्संयोगज्ञानस्य भ्रमत्वात्। संयोगावच्छेदेन संयोगसंबंधस्य सत्वात् नातिव्याप्तिः। यथार्थानुभवं विभजते। यथार्थेति। प्रसंगात्प्रमाकरणं विभजते। तत्करणं प्रमाकरणमित्यर्थः। प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं। करणलक्षणमाह। असाधारणेति। साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारणेति। कारणलक्षणमाह। कार्येति। पूर्ववृत्ति कारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति। तावन्मात्रे कृते कार्येऽतिव्याप्तिः स्यादतः पूर्ववृत्तीति। ननु

तंतुरूपमपि पटं प्रति कारणं स्यादत इति चेन्न। अनन्यथासिद्धत्वे सतीति विशेषणात्। अनन्यथासिद्धत्वं अन्य-
थासिद्धिविरहः। अन्यथासिद्धिश्च त्रिविधा। येन सहैव यस्य यं प्रति पूर्ववृत्तित्वं अवगम्यते तेन तेनान्यथासि-
द्धं। यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति। अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्य-
ते तं प्रति तदन्यथासिद्धं। यथाकाशः शब्दं प्रति पूर्ववर्तित्वे ज्ञाते एव पटं प्रति आकाशस्य। अन्यत्र क्लृप्तनियतपूर्व-
वृत्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं। यथा पाकजस्थले गंधं प्रति रूपप्रागभावस्य। एवं
च अनन्यथासिद्धिनियतपूर्ववृत्तित्वं कारणत्वं। कार्यलक्षणमाह। कार्यमिति। कारणं विभजते। कारणमिति। स-
मवायिकारणं लक्षयति। यत्समवेतं इति। यस्मिन्समवेतमित्यर्थः। असमवायिकारणं लक्षयति। कार्येणेति। कार्ये-
णेत्येतदुदाहरति। यथा तंतुसंयोग इति। कार्येण पटेन सह एकस्मिन् तंतौ समवेतत्वात् तंतुसंयोगः पटस्यासम-
वायिकारणं। कारणेन सहेत्येतदुदाहरति। तंतुरूपमिति। कारणेन पटेन सह एकस्मिन् तंतौ समवेतत्वात् तं-
तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः। निमित्तकारणं लक्षयति। तदुभयेति। समवाय्यसमवायिभिन्नं निमि- स
त्तमित्यर्थः। कारणलक्षणमुपसंहरति। तदेतदिति। प्रत्यक्षलक्षणमाह। तत्रेति। प्रमाणचतुष्टयमध्ये इत्यर्थः।
प्रत्यक्षज्ञानस्य लक्षणमाह। इंद्रियेति। इंद्रियं चक्षुरादि। अर्थो घटादिः तयोः संनिकर्षः संयोगादिः तज्जन्यं ज्ञा-
नमित्यर्थः। निर्विकल्पकं लक्षणमाह। निःप्रकारकमिति। विशेषणविशेष्यानवगाहि ज्ञानमित्यर्थः। ननु निर्विकल्प- राम

के किं प्रमाणमिति चेन्नाशेऽदिति। विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवत्। इत्यनुमा
नस्य प्रमाणत्वात्। विशेषणज्ञानस्यापि सविकल्पकत्वेऽनवस्थाप्रसंगात् निर्विकल्पकसिद्धिः। सविकल्प
कं लक्षयति। सप्रकारकमिति। नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः। सविकल्पक
मुदाहरति। यथेति। इंद्रियार्थसन्निकर्षं विभजते। प्रत्यक्षेति। संयोगसन्निकर्षमुदाहरति। चक्षुषेति। द्रव्यप्र
त्यक्षे सर्वत्र संयोगः सन्निकर्षः इत्यर्थः। आत्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेन ततः प्रत्यक्षज्ञान
मुत्पद्यते। संयुक्तसमवायमुदाहरति। घटरूपेति। तत्र युक्तिमाह। चक्षुःसंयुक्त इति। संयुक्तसमवेतसमवाय
मुदाहरति। रूपत्वेति। समवायमुदाहरति। श्रोत्रेति। तमुपपादयति। कर्णेति। ननु दूरस्थशब्दस्य कथं श्रो
त्रसंबंध इति चेन्न। वीचीतरंगन्यायेन कदंबगोलकन्यायेन वा शब्दांतरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श
ब्दस्य श्रोत्रसंबंधात् प्रत्यक्षसंभवात्। समवेतसमवायमुदाहरति। शब्दत्वेति। विशेषणभावमुदाहरति।
अभावेति। तमुपपादयति। घटाभाव इति। भूतले घटो नास्तीत्यत्र अभावस्य विशेषणत्वं द्रष्टव्यं। एतेन
अनुपलब्धेः प्रमाणांतरं निरस्तं। यद्यत्र घटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत। दर्शनाभावान्नास्ती
ति तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेनेंद्रियेणैवाभावज्ञानोपपत्तौ अनुपलब्धेः प्रमा

त० दी०
७

7

णं तर्हि संबंधात्। अभावज्ञानार्थमपि इन्द्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः करणत्वस्याप्रामाणिक-
त्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः। प्रत्यक्षज्ञानमुपसंहरन्
तस्य करणमाह। एवमिति। असाधारणकारणं त्वादीन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थः। प्रत्यक्षमुपसंहरति।
तस्मादिति॥ ॥ अनुमानं लक्षयति। अनुमितिकरणमिति। अनुमितेर्लक्षणमाह। परामर्शेति। ननु संश-
योत्तरप्रत्यक्षेऽतिव्याप्तिः। स्थाणुपुरुषसंशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष
एवेति प्रत्यक्षजननात्। न च तत्रानुमितिरेवेति वाच्यं। पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधादिति चेन्न।
पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता। सा-
ध्यसिद्धिरनुमितिप्रतिबंधिका। सिद्धिसत्त्वेप्यनुमिनुयामितीच्छायामनुमितिदर्शनात्। सिषाधयिषा उत्तेजि-
का। ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकरणत्ववत्। सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्या-
नुमितिकरणत्वं। परामर्शं लक्षयति। व्याप्तीति। व्याप्तिविषयकं पक्षधर्मताज्ञानं परामर्श इत्यर्थः। परामर्-
र्शमभिनीय दर्शयति। यथेति। अनुमितिमभिनीय दर्शयति। तज्जन्यमिति। परामर्शजन्यमित्यर्थः। व्याप्तेर्लक्ष-
णमाह। यत्रेति। यत्र धूम इति व्याप्तेरभिनयः। साहचर्यनियम इति लक्षणं। साहचर्यं सामानाधिकरण्यं तस्य नि- राम
यमः। हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः। पक्षधर्मतास्वरूपमा- ७

ह। व्याप्यस्येति। स्वार्थानुमितिं दर्शयति। स्वयमेवेति। भूयो दर्शनेनेति। ननु पार्थिवत्वलोहलेख्यत्वादौ श-
तशः सहचारदर्शनेपि व्यभिचारोपलब्धेर्भूयोदर्शनेन कथं व्याप्तिग्रह इति चेन्न। व्यभिचारज्ञानविरह-
सहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात्। व्यभिचारज्ञानं निश्चयः। शंका वा। तद्विरहः क्वचित्तर्कात्
क्वचित्स्वतःसिद्ध एव। धूमाग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्तर्को व्यभिचारशंकानिवर्तकः।
ननु सकलवह्निधूमयोः सन्निकर्षाभावात्कथं व्याप्तिग्रहः इति चेन्न। धूमत्ववह्नित्वसामान्यलक्षणप्रत्यास-
त्त्या सकलधूमवह्निज्ञानसंभवात्। तस्मादिति। लिंगपरामर्श इत्यर्थः। परार्थानुमानमाह यत्त्विति। यत्तु स्व-
तत्परार्थानुमानं। इति तच्छब्देनान्वयः। पंचावयववाक्यमुदाहरति। यत्रेति। अवयवस्वरूपमाह। प्रतिज्ञेति। उप-
हृते वाक्ये प्रतिज्ञात्वादिविशेषमाह। पर्वतो वह्निमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पंचम्यंतं लिंगप्रतिपादकं
हेतुः। व्याप्तिप्रतिपादकं उदाहरणं। पक्षधर्मताज्ञानार्थमुपनयः। अबाधितत्वादिकं निगमनं प्रयोजनं। अनु-
मितिकरणमाह। स्वार्थेति। ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यां अनुमितिसंभवे विशिष्टलिंगपरामर्शः। कि-
मर्थमंगीकर्तव्य इति चेन्न। वह्निव्याप्यधूमवानिति शाब्दपरामर्शस्थले परामर्शस्य आवश्यकतया लाघ-
वेन सर्वत्र परामर्शस्यैव करणत्वात्। लिंगं न करणं। अतीतादौ व्यभिचारात्। व्यापारवत्कारणं करणमिति म

त०दी०
८
8

ते परामर्शद्वारा व्याप्तिज्ञानं करणं। अन्वयेनेति। तत्कृन्यत्वे सति तत्कार्यजनको व्यभिचारः। अनुमानमुपसंहर
ति। तस्मादिति। लिंगं विभजते। लिंगमिति। अन्वयव्यतिरेकि लक्षयति। अन्वयेनेति। हेतुसाध्ययोर्व्याप्तिरन्व
यव्याप्तिः। तदभावयोर्व्यतिरेकव्याप्तिः। केवलान्वयिनो लक्षणमाह। अन्वयेनेति। केवलान्वयिसाध्यकं केव
लान्वयि। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं। ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति
व्यतिरेकाभावः। व्यतिरेकिणमाह। पृथिवीति। ननु इतरेतरभेदप्रसिद्धो न वा। आद्ये यत्र प्रसिद्धस्तत्र हेतुस
त्वे अन्वयित्वं। असत्त्वे असाधारण्यं। द्वितीये साध्याज्ञानाभावात् कथं तद्विशिष्टानुमितिः। विशेषणज्ञाना
भावे विशिष्टज्ञानानुदयात्। प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न। जलादित्रयो
दशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते। त्रयोदशत्वावच्छिन्नसाध्यस्य
एकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्ये। प्रत्येकाधिकरणप्रसिद्ध्या ततसाध्यविशिष्टानुमि
तिः। व्यतिरेकिव्याप्तिनिरूपणं चेति। पक्षलक्षणमाह। संदिग्धेति। ननु श्रवणानन्तरभाविमननस्थले अव्या
प्तिः। तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात्। किंच प्रत्यक्षेऽपि वह्नौ पक्षे इच्छयाऽनुमितिः। तत्राव्याप्तिरि
ति चेन्न। उक्तपक्षतात्रयवत्त्वस्य पक्षताश्रयत्वस्य पक्षलक्षणत्वात्। सपक्षलक्षणमाह। निश्चितेति। विपक्षल राम
८

रूणमाह। विशिष्टेति। एवं सद्धेतुं निरूप्यासद्धेतुं निरूपयितुं विभजते। स व्यभिचारेति। अनुमितिप्रतिबं
धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं। सव्यभिचारं विभजते। सव्यभिचार इति। साधारणं लक्षयति। त
त्रेति। उदाहरति। यथेति। असाधारणं लक्षयति। सर्वेति। अनुपसंहारिणो लक्षणमाह। अन्वयेति। विरु
द्धं लक्षयति। साध्येति। सत्प्रतिपक्षं लक्षयति। यस्येति। असिद्धं विभजते। असिद्ध इति। आश्रयासिद्धमुदाह
रति। गगनेति। स्वरूपासिद्धमुदाहरति। शब्द इति। व्याप्यत्वासिद्धलक्षणमाह। सोपाधिको व्याप्यत्वासिद्ध इ
ति। उपाधिलक्षणमाह। साध्येति। उपाधिश्चतुर्विधः। केवलसाध्यव्यापकः। पक्षधर्मतावच्छिन्नसाध्य
व्यापकः। साधनावच्छिन्नसाध्यव्यापकः। उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति। आद्यः। आर्द्रेन्धनसंयो
गः। द्वितीयो यथा। वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षव्यापकं उद्भूतरूपवत्त्वं। तृतीयो
यथा। प्रागभावो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं। चतुर्थस्तु प्रागभावो वि
नाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं। बाधितस्य लक्षणमाह। यस्येति। अत्र बा
धकस्य ग्राह्याभाववन्निश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबंधकत्वं।
इतरेषां तु परामर्शप्रतिबंधकत्वं। तत्रासाधारणस्याव्यभिचाराभाववत्तया विरुद्धस्य सामानाधिकरण्याभा

तं॰दी॰
६
९

वर्त्तमानव्याप्यत्वासिद्धस्य विशिष्टस्याभावात् न तत्र अस्मन्मते एतेनानुपसंहारि एते ऽर्थाः इति संक्षेपाद्याय कर्त्तव्य
व्याप्तिज्ञानप्रतिबंधकत्वं। आश्रयासिद्धस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वं। उपाधिस्तु व्य
भिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबंधकः। सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धेऽन्तर्भवति।
निग्रहस्थानान्तरमिति नवीनाः॥ २॥ उपमानं लक्षयति। उपमितीति॥ ३॥ शब्दं लक्षयति। आप्तेति। पदलक्ष
णमाह। शक्तमिति। अर्थस्मृत्यनुकूलपदपदार्थसंबंधः शक्तिः। सा च पदार्थान्तरमिति मीमांसकाः। तन्नि
रासार्थमाह। अस्मादिति। डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः। ननु पदार्थान्तरमस्त्वर्थः। गवादिश
ब्दानां जातावेव शक्तिः। विशेषणतया जातेः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्तु आक्षेपादिनेति केचित् तन्न।
गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात्। श
क्तिग्रहश्च वृद्धव्यवहारेण। व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्ति
मुपलभ्य गवानयनं दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चि
त्य अश्वमानय गां बधानेति वाक्यांतरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः। अश्वपदस्य अश्व
त्वविशिष्टे इति व्युत्पद्यते। ननु सर्व[illegible] कार्यपरत्वात् व्यवहारस्य कार्यवाक्य एव व्युत्पत्तिः। न सिद्धपर इति चेन्न।

राम
६

कं कां त्रिभुवनतिलको भूपतिरित्यादौ लिङ्गेऽपि बहुवचनत्वाविकल्पितपदेन भूनिमधुकरः पिबतीत्यादौ
प्रसिद्धपदसमभिव्याहारात् लिङ्गेऽपि मधुकरादिव्युत्पत्तिदर्शनात्॥ लक्षणापि वृत्तिः। शक्यसंबंधो ल
क्षणा। गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधात् देवतीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते। संबंधश्चा
दौ जवलक्षण्ययोः परस्परसंबंधाभावान्नानाशक्तिकल्पनं। लक्षणा त्रिविधा॥ ॥जहल्लक्षणा। अजहल्ल
क्षणा। जहदजहल्लक्षणा चेति। यत्र वाच्यार्थस्यान्वयाभावः तत्र जहती। यथा मंचाः क्रोशंतीति। यत्र वाच्यस्या
पि अन्वयस्तत्र अजहती। यथा छत्रिणो गच्छंतीति। यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहती।
यथा तत्त्वमसीति। गौणापि लक्षणैव लक्ष्यमाणगुणसंबंधरूपा। अग्निर्माणवक इति। यत्र नापि शक्तिलक्ष
णं तत्र गौणी अर्थशक्तिमूला वा। अनुमानादिना अन्वयासिद्धौ तात्पर्यानुपपत्तिर्लक्षणाबीजं। तत्प्रतीतिश्च
यष्टीः प्रवेशयेत्यत्र। तात्पर्यज्ञानेन वक्त्रभिप्रायज्ञाने हेतुः। नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं।
द्वारमित्यादौ पिधेहीति शेषः अध्याहारः। ननु अर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासंभवात्। अर्था
ध्याहार एव युक्त इति चेन्न। पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात्। अन्यथा घटः कर्मत्वमानय
नं कृतिरित्यत्रापि शाब्दज्ञानप्रसंगात्। पंकजादिपदे योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्तिः रूढिः।

त०दी०
१०
10

नियतपदसमूहार्थानां समुदायशक्तिः । अन्यथा कुमुदेऽपि प्रयोगप्रसंगः । इतरान्विते शक्तिरिति प्राभाकराः ।
अन्वयस्य वाक्यार्थतया भानसंभवात् । अन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः । आकांक्षेति । आ
कांक्षादि ज्ञानमित्यर्थः । अन्यथा आकांक्षादिभ्रमात् शाब्दभ्रमो न स्यात् । आकांक्षां लक्षयति । पदस्येति ।
आसत्तिरिति । सन्निधिलक्षणमाह । पदानामिति । अविलंबेन पदार्थोपस्थितिः संनिधिः । उच्चारणं तु तदुप
योगितयोक्तं । गौरश्व इति । घटः कर्मत्वमित्यत्र आकांक्षोदाहरणं द्रष्टव्यं । वैदिकस्य विशेषमाह । अविलंबेन
पदार्थोपस्थितिः सन्निधिः । वैदिकं ईश्वरोक्तत्वादिति । ननु वेदस्यानादित्वात्कथं ईश्वरोक्तत्वमिति चेन्न ।
वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत् । न च स्मर्यमाणकर्तृत्वमुपाधिः । गौतमप्रभृतिभिः शिष्यपरंपर
या वेदेऽपि कर्तृस्मरणे न साध्यव्यापकत्वात् । तस्मात्तपस्तेपानात्त्रयो वेदा अजायंत इति श्रुतेश्च । ननु वर्णा
नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात् । तथा च कथं वेदस्यानित्यत्वमिति चेन्न । उत्पन्नो गकारो विन
ष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् । सोऽयं गकार इति प्रत्यभिज्ञा सेयं दीपज्वालेतिवत् जात्यालंबन
सात्वा वर्णानां नित्यत्वेऽपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च । तस्मादीश्वरोक्तो वेदः । मन्वादिस्मृती
नां आचाराणां च वेदमूलकतया प्रामाण्यं । स्मृतिमूलवाक्यानामिदानीमनध्ययनात् तन्मूलभूता काचि

राम
१०

व्याप्त्यो सम्बन्धेति कल्प्यते। अनुपलभ्यमाने वेदे वाक्ये सादृश्यकल्पितु मन्त्रवत्तपाविप्रकीर्णवादस्याप्रमुन्नेवा
न्तः प्रसिद्ध्यानुमेयो वेदो मूलत्वं इति चेन्न। तथाविधवर्णानुपूर्वीतां ने भावे न कोप्यकत्वो संभवात्। नन्वेतानि वक्ता
निस्माद्रितार्थसंसर्गवंति। आकांक्षादिमत्त्वात् इदंवकलत्। महाभारतवत्। इत्यनुमानादेव संसर्गातानसं
भवात्। शाब्दो न प्रमाणांतरमिति चेन्न। अनुमितिभिन्नोपपत्त्यापायज्ञानविषयसर्गप्रकृते शाब्दान्तमीत्यनुभवसा
यसाक्षिकस्य सर्वसंमतत्वात्। नन्वर्थापत्तिरपि प्रमाणांतरमस्ति। पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा
रात्रिभोजनं विना पीनत्वोपपत्त्या अर्थापत्त्या रात्रिभोजनं कल्प्यते इति चेन्न। देवदत्तो रात्रौ भुंक्ते दिवाऽभ
भुंजानत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात्। एतेनैवंवादिति संभवोप्यनुमानमेवा
इह वटे यक्षः इत्यैतिह्यमपि चेष्टापि ज्ञानानन्तरं व्यक्तं शब्दानुमानद्वारा व्यवहारहेतुरिति
न प्रमाणांतरं। तस्मात् प्रत्यक्षानुमानोपमानशब्दाख्यान्येव प्रमाणानि। ज्ञानानां तदितरस्य प्रामाण्यं स्वतो ग्राह्यं प
रतो वेति विचार्यते। तत्र विप्रतिपत्तिः। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावद्ग्राहकसामग्रीग्राह्यं न वा।
अप्रमावित्ति कोटिः स्वतस्त्वं। निषेधकोटिः परतस्त्वं। अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति। इदं
ज्ञानं अप्रमेति ज्ञानेन प्रामाण्याग्रहात्। तद्वारणाय अप्रामाण्याग्राहकेति। इदं ज्ञानमप्रमेति अनुव्यव
सायनिष्ठप्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यादतः यत्र सदिति। तस्मिन् प्रामाण्यग्राह्यत्वे प्रा

प्रामाण्यग्राहकेत्यर्थः। उक्तरूपतत्त्वज्ञेयव्यवसायेऽप्रामाण्यग्राहकस्यापि अनुव्यवसायेऽतद्ग्राहकत्वात्स्वतस्त्व
सिद्धिः। ननु स्वत एव प्रामाण्यं गृह्यते। घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि
विषयीकरणात्। व्यवसायस्य प्रत्यासत्तेस्तुल्यत्वात्। पुरोवर्त्तिनि प्रकारसंबंधस्यैव प्रमात्वपदार्थत्वा
दिति चेन्न। स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात्। अनुव्यवसा
येन प्रामाण्यस्य निश्चितत्वात्। तस्मात्स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वं। तथाहि। प्रथममुत्पन्नं जलज्ञानं त
त्प्रवृत्तौ सत्यां जलत्वाभिलाषेति पूर्वोत्पन्नं जलज्ञानं प्रमा। समर्थप्रवृत्तिजनकत्वात्। यन्नैवं तन्नैवं। यथा अ
प्रमेति। व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेनान्वय
व्यतिरेकिणा निगृह्यते। प्रमायां गुणजन्यत्वमुपपादयतस्त्वं। प्रमाऽसाधारणकारणं गुणः। तत्राऽप्रमासाधार
णकारणं दोषः। तत्र प्रत्यक्षे विशेषणवत्तया विशेष्यसन्निकर्षो गुणः। अनुमितौ व्यापकवति व्याप्यज्ञानं। उप
मितौ यथार्थसादृश्यज्ञानं शब्दज्ञाने। यथार्थयोग्यतादिज्ञानमित्याद्यूह्यं। पुरोवर्त्तिप्रकाराभावस्य व्यवसाये
नऽनुपस्थितत्वात्। अप्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वात् तस्यैव परतस्त्वं। ननु सर्वज्ञानानां यथा
र्थत्वात्। अयथार्थज्ञानमेव नास्ति। न च शुक्ताविदं रजतमिति ज्ञानात् प्रवृत्तिदर्शनात् अन्यथाख्यातिरि
ति वाच्यं। इदं रजतं स्मृति पुरोवर्त्ति रजतज्ञानाभ्यामेव प्रवृत्तिसंभवात्। उपस्थिते इष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तक

त्वेनवेदं रजतमित्यादावतिप्रसंगाभावादितिचेन्न। सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रका
रकज्ञानस्य जायमानत्वेन प्रवृत्तिजनकतया सुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्प
नात्। अयथार्थानुभवं विभजते। अयथार्थेति। स्वप्रस्य मानसविपर्ययरूपत्वान्न त्रैविध्यविरोधः। सं
शयलक्षणमाह। एकेति। घटपटाविति समूहालंबनेति अतिव्याप्तिवारणाय एवकेति। घटो द्रव्यमित्यादावति
व्याप्तिवारणाय विरुद्धेति। घटत्वविरुद्धपटत्ववान्नित्य जाति व्याप्तिवारणाय नानेति। विपर्ययलक्षण
माह। मिथ्येति। तदभाववति तत्प्रकारकनिश्चयः। रजतभ्रमः। तर्कं लक्षयति। व्याप्येति। प्रपंचितः तर्को विपर्ययेंतर्भवति
तथापि प्रमाणानुग्राहकत्वात् भेदेन कीर्तनं। स्मृतिं विभजते। स्मृतिरिति। सुखं लक्षयति। सर्वेषामिति। सुखम
हमित्याद्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं। प्रत्युतं तु स्वरूपकथनमिति। द्रव्यं संस्कारं वि
भजते। संस्कार इति। संस्कारत्वजातिमान् संस्कारः। वेगस्याश्रयमाह। वेगत्वजातिमान्वेगः। भावनां लक्षय
ति। अनुभवेति। आत्मादावतिव्याप्तिवारणाय अनुभवेति। अनुभवध्वंसे अतिव्याप्तिवारणाय स्मृती
ति। स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तं। स्थितस्थापकं लक्षयति। अन्यथेति। संख्यादयोष्टौ नैमित्ति
कद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः। अन्ये रूपादयो विशेषगुणाः। द्रव्यविभाजकोपाधिद्वयस

अतिव्याप्तिवारणाय अनेकेति। अनुगतत्वं समवेतत्वं। तेन नाभावादावतिव्याप्तिः। विशेषं लक्षयति। नित्येति। समवायं लक्षयति। नित्यसंबंध इति। संयोगेऽति उ॰ले॰३

मानाधिकरणवृत्तिजातिमत्त्वं विशेषगुणत्वं। कर्मत्वं लक्षणमाह। चलनेति। उत्क्षेपणादीनां कार्यभेदमा
ह। ऊर्ध्वेति। शरीरेति। वक्रतासंपादकमाकुंचनं। सरलतासंपादकं प्रसारणमिति स्पर्शः। सामान्यं लक्षयति। नि
त्यमिति। परमाणुपरिमाणादावतिव्याप्तिवारणाय नित्य इति। आकाशादावति व्याप्तिवारणाय संबंध इ
ति। अयुतसिद्धिं लक्षणमाह। ययोरिति। नीलो घट इति विशिष्टप्रतीतिः। विशेषणविशेष्यसंबंधविषया विशिष्ट
प्रत्ययात्। दंडीत्यादिवत्। इति समवायसिद्धिः। अवयवावयविनाविति। द्रव्यसमवायिकारणं। वयवजन्यद्रव्य
मवयवि। प्रागभावं लक्षयति। अनादिरिति। आकाशादावति व्याप्तिवारणाय सांत इति। घटादावति व्याप्ति
वारणाय अनादिरिति। प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनको भविष्यतीति व्यवहारहेतुः प्रागभा
वः। ध्वंसं लक्षयति। सादिरिति। घटादावतिव्याप्तिवारणाय अनंतेति। आकाशादावतिव्याप्तिवारणाय सादि
रिति। प्रतियोगिजन्यः प्रतियोगिसमवायिवर्त्ती ध्वस्त इति व्यवहारहेतुर्ध्वंसः। अत्यंताभावं लक्षयति। त्रैकालिक इ
ति। अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिन्नेति। ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालि
क इति। अन्योन्याभावं लक्षयति। तादात्म्येति। प्रतियोगितावच्छेदकारोप्यसंसर्गभेदादेकप्रतियोगिकयोरत्यं
ताभावान्योन्याभावयोर्भेदः। केवलदेवदत्ताभावाद्दंडिदेवदत्ताभाव इति प्रतीत्या विशिष्टाभावः। एकसत्त्वेऽपि

नस्तः। इति प्रतीत्या घटत्वावच्छिन्नाभावः। संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः। तत्तत्संब-
न्धाभावात् घटत्वावच्छिन्नप्रतियोगिकसामान्याभावस्यातिरिक्तः। एवमन्योन्याभावोपि। घटत्वावच्छिन्न-
पटो नास्तीति प्रामाणिकत्वेन घटत्वावच्छिन्नाभावो नांगीक्रियते। पटे घटत्वं नास्तीति तस्यार्थः। अतिरिक्तत्वे स-
केवलान्वयी। सामयिकाभावोऽत्यंताभाव एव। समयविशेषे प्रतीयमानः। घटाभाववति घटानयने अत्यंताभा-
वस्यान्यत्रगमनाभावेपि अप्रतीतेः। घटापसारणे सति प्रतीतेः। भूतले घटसंयोगप्रागभावध्वंसयोरत्यंता-
भावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोगप्रागभावध्वंसयोः सत्त्वात्। अत्यंताभावस्याप्रती-
तेः। घटापसारणे संयोगध्वंससत्त्वात् प्रतीतिरिति। केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो नप-
दार्थान्तरमिति गुरवः। अभावानंगीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात्। अभावाभावो भाव एव। नातिरिक्तः। अ-
नवस्थाप्रसंगात्। ध्वंसप्रागभावो ध्वंसस्य प्रतियोग्येव। अन्याभावाभावोऽतिरिक्त एव। तृतीयाभावस्य प्रथम-
त्वात्। ज्ञानवत्स्येति नवीनाः। ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितं-
डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्था नामुक्त-
त्वात् कथं सप्तैवेत्यत आह। सर्वेषामिति। प्रमाणस्येवांतर्भावस्त्वर्थः। आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रे-
त्यभावफलदुःखापवर्गास्तु प्रमेयमिति विभागात् द्वादशविधं प्रमेयं। प्रवृत्तिधर्माधर्मौ। रागद्वेषमोहा दोषाः। [illegible]

नं॰दी॰
१३
13

द्वेषो मन्युः क्रोधः इत्यादिवाच्यमानः। प्रेत्यभावो मरणं। फलं भोगः। अपवर्गो मोक्षः। स च सर्वसमानाधिकरण
दुःखप्रागभावासमानकालीनदुःखध्वंसः। प्रमेयज्ञानेन तु स्वं दुःखहानिश्च। दृष्टांतो महानसादिः। प्रामाणिक
त्वेनाभ्युपगतोऽर्थः सिद्धांतः। निर्णयो निश्चयः। प्रमाणफलं। तत्त्वबुभुत्सोः कथा वादः। उभयसाधनवती विजि
गीषुकथा जल्पः। स्वपक्षस्थापनाहीना वितंडा। कथा नानावक्तृकपूर्वोत्तरवादपक्षसंदर्भः। अभिप्रायांतरेण
प्रयुक्तस्यार्थांतरं प्रकल्प्य दूषणं छलं। असदुत्तरं जातिः। सा च साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविक
ल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपल
ब्धिकारणनित्यानित्यकार्यसमनामानः। वादिनोऽपजयहेतुर्निग्रहस्थानं। प्रतिज्ञाहानिः प्रतिज्ञांतरं। प्र
तिज्ञाविरोधः। प्रतिज्ञासंन्यासः। हेत्वंतरं। अर्थांतरं। निरर्थकं। अविज्ञातार्थं। अपार्थकं। अप्राप्तकालं। न्यू
नं। अधिकं। पुनरुक्तं। अननुभाषणं। अज्ञानं। अप्रतिभा। विक्षेपः। मतानुज्ञा। पर्यनुयोज्योपेक्षणं। निरनुयो
ज्यानुयोगः। अपसिद्धांतः। हेत्वाभासाश्च निग्रहस्थानं। शेषं स्पष्टं। ननु कथं तत्तजातं च संयोगस्यापि प्रतिबंधके
सति दाहानुत्पत्तेः शक्तिः पदार्थांतरमिति चेन्न। प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन तत्केऽनुपपत्तेः। गा
नूं। कारणस्यैव शक्तिपदार्थत्वात्। नतु भस्मादिनाकां स्फोटोत्पत्तिर्दर्शनात्। आत्मेयशक्तिरंगीकार्येति राम
चेन्न। भस्मादियोगसमानकालीनसंबंधस्य प्रतिबंधकतया तदभावसहितभस्मादिसंयोगस्य
१३

स्यकृतिवत्तदर्थत्वात्। सत्यमपि न पदार्थान्तरं। यथोक्तविध्यर्थयोगक्षेमत्वस्यास्वत्वेऽरूपवत्त्वात्। तद्वक्तृत्वे कं च प्रतिग्र
हादिलक्षणत्वमेवेति। अत एव विधिर्निरूप्यते: प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः। तत्प्रतिपादको
लिङादिर्वा। ९— साध्ये प्रवृत्त्यदर्शनात्। कृतिसाध्यताज्ञानं प्रवर्तकं। न च विषभक्षणादौ प्रवृत्तिप्रसंगः। इष्ट
साधनताज्ञानं लिङ्। कृतिसाध्यताज्ञानस्य कामस्य च लोके विहितकालजीवित्वनिमित्तज्ञानं तदस्य नित्यनैमित्तिके
ष्वलेप्रवर्तकत्वात्। न चाननुगमः। स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानुगतत्वात् तदुक्तं गुरुभिः। तन्ना
शाभावेन कृतिसाध्येष्टसाधनताज्ञानस्यैव विधित्वं चिकीर्षाद्वारा प्रयत्नजनकत्वात्। न च नित्येष्टसाधनताभावा
त्प्रवृत्तिप्रसंगः। तत्रापि प्रत्यवायपरिहारस्य फलस्य च फलवत्त्वकल्पनात्। तस्मात्कृतिसाध्येष्टसाधन
त्वमेव लिङर्थः। ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङा स्वर्गसाधनतयार्थं प्रतीयते। यागस्य चाशुविना
शिनः कालान्तरभाविस्वर्गसाधनत्वायोगात्। यो अस्यापि कार्यत्वमपूर्वमेव लिङर्थः। कार्यं कृतिसाध्यं। कृतेः सविष
यत्वात्। विषयाकांक्षायां यागो विषयत्वेनान्वेति। कस्य कार्यमित्याकांक्षायां स्वर्गकामपदं नियोज्यपरत
यान्वेति। कार्यबोद्धा नियोज्यः। तेन ज्योतिष्टोमेन यागविषयं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते।
वैदिकलिङस्त्वात्यापयक्तीवमस्थि होर्जं तु कुर्यादित्यादि नित्यवाच्येपि अपूर्वमेव वाच्यमिष्यते। आरोग्यकामो भेषजं पा
नं कुर्यादित्यादौ लौकिकलिङा क्रियाकार्यत्वावगतेरिति चेन्न। यागस्यापूर्वं प्रयोजकतानिश्चयाभावेन साधनतयाप

तीत्यनंतरं तन्निर्वाहार्थं चावांतरव्यापारतया च पूर्वकश्रवणात् कीर्तनादिनान्वयस्तुतेः। नयागध्वंसेऽप्यापा
दः लोकस्तुत्यपत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति। लिङ्त्वेन कृत्येऽणविध्य
र्थो न्याय्यत्वात् तत्त्वेन प्रयत्नार्थकत्वं पचति कं कं करोतीति विवरणदर्शनात्। किं करोतीति प्रश्ने पचतीत्युत्तरा
च्चाख्यातस्य प्रयत्नार्थत्वेन निश्चयात्। यो गच्छतीत्यादौ तु कृत्यपदे लक्षणा। देवदत्तः पचति देवद
त्तेन पच्यते तंडुल इत्यादौ कर्तृत्वकर्मत्वे नाख्यातार्थत्वं किं तु तद्गतैकत्वादीनामेव तयोरन्वयो देवजामः।
प्रयजतीत्यादौ च्यातोऽयातोरेव प्रकृत्यर्थकृतिः। उपसर्गात्मकं प्रयोलकत्वमेव न तत्र शक्तिरिति। पदार्थज्ञानस्य पदप्रयो
गनं मोक्षः। तथाहि। आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्व
बोधनात्। श्रुत्यादेहादिभिन्नलक्षणात्मज्ञाने सत्यपि विजातीयसंभावनानिवृत्तेः। पुत्रवत्संध्यानरूपमननस्यावश्यकत्वात्। म
ननोपयोगिपदार्थनिरूपणद्वारतान्यस्यापि मोक्षोपयोगः। तदनंतरं श्रुत्यादि उपयोगनिदिध्यासि
ते कृते तत्र देहादिभिन्नलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावा
त् प्रवृत्त्यभावे धर्माधर्मयोरभावात्। तदभावे धर्माधर्मयोरभावात्। जन्माभावे पूर्वधर्माधर्मयोरनुभवेन
नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः। ज्ञानमात्रसाध्यत्वात्
तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति साधनांतरनिषेधाच्च। ननु तत्प्राप्तिहेतु ज्ञानं। क

र्मवोक्तं महाप्रभु नैष्मिकर्मणोपि मोक्षसाधनत्वस्मरणात्। ज्ञानकर्मणोः समुच्चय इति चेन्न। नित्यनैमित्तिकै
व कुर्वाणो दुरितक्षयं। ज्ञानं तु विमलीकुर्वन् अभ्यासेन तु पावयेत्। अभ्यासात्पक्वविज्ञानं कैवल्यं लभते न
रः। इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात्। ज्ञानद्वारैव कर्म मोक्षसाधनं। न साक्षात्। तस्मात्पदार्थ
ज्ञानान्मोक्षः परमप्रयोजनमिति सर्वं रमणीयं। इति श्रीमदन्नंभट्टोपाध्यायविरचिता तर्कसंग्रहदीपिका समाप्ता॥
संवत् १७८७ वर्षे चैत्रमासे कृष्णपक्षे प्रतिपदा लिखितं बालकृष्णेन॥ ॥हरिकृष्णपठनार्थं॥ ॥ ॥

तर्कसंग्रहदीपिकांसमाप्ता

दी।बालकृष्णजीजोशी

